तावत्कालं रजन्यां च वर्तन्त्यां सलिलात्मनः ।।१३६
ततस्ते सलिले तस्मिन् नष्टाग्नौ पृथिवीतले ।
प्रशांतवातेऽन्धकारे निरालोके समंततः ।।१३७
येनैवाधिष्ठितं ह्येदं ब्रह्मणः पुरुषः प्रभुः ।
विभागमस्य लोकस्य प्रकर्तुं पुनरैच्छत ।।१३८
एकार्णवे ततस्तस्मिन्नष्टे स्थावरजङ्गमे ।
तदा भवति स ब्रह्मा सहस्राक्षः सहस्रपात् ।।१३९
सहस्रशीर्षा पुरुषो रुक्मवर्णो ह्यतींद्रियः ।
ब्रह्मा नारायणाख्यस्तु सुष्वाप सलिले तदा ।।१४०
सत्वोद्रेकात्प्रबुद्धस्तु स शून्यं लोकमैक्षत ।
अनेनाद्येन पादेन पुराणं परिकीर्तितम् ।।१४१

उसके अन्दर जिससे सभी ओर से इस पृथ्वी का विस्तार किया करता है । धातु विस्तार को फैलाता है उसके पश्चात् उपतनु कहे गये है । ।१३४। णार यही ही शीर्ण हो जाने पर अनेक अर्थ धातु कहा जाया करता है । एकमात्र समुद्र में जल ही होते हैं । उससे वे नर शीर्ण नहीं होते हैं । ।१३५। उस एक सहस्र युगों के अन्त में ब्रह्मा के दिन के संस्थित होने पर तब तक के समय में सलिलात्मा की रात्रि के बसने पर रजनी ही रहती है ।।३६। इसके उपरान्त उस जलमें विनष्ट अग्नि वाले पृथ्वी तल में–वायु के एक दम प्रशान्त होने पर एक दम अन्धकार रहता है और सभी ओर आलोक

का अभाव होता है ।१३७। जिसके द्वारा यह अधिष्ठित है ब्रह्मा के पर पुरुष प्रभु ने इस लोक के विभाग करने की इच्छा की थी ।१३८। उस समय में केवल एक ही समुद्र था और सभी चर तथा अचर जगत् एकदम विनष्ट हो गया था । तब वह ब्रह्मा सहस्रों पादों वाले होते हैं ।१३९। वह पुरुष सहस्रों शीर्षों वाले हैं जिनका वर्ण सुवर्ण के समान है और जो इन्द्रियों की पहुँच से परे हैं । उस समय में नारायण नामधारी ब्रह्माजी जल में शयन कर रहे थे ।१४०। सत्व के उद्रेक से प्रकृष्ट ज्ञान वाले उन्होंने सम्पूर्ण लोक को शून्य देखा था । इस आद्य पाद ने पुराण को परिकीर्तित किया था ।१४१।

कल्प प्रतिसन्धि वर्णनम्

सूत उवाच—इत्येवं प्रथमं पादं प्रकृत्यर्थं प्रकीर्तितम् ।
श्रुत्वा तु संहृष्टमनाः कापेयः संशयायति ॥१
आराध्य वचसा सूतं तस्यार्थं त्वपरां कथाम् ।
अथ प्रभृति कल्पज्ञ प्रतिसंधिः प्रचक्षते ॥२
समतीतस्य कल्पस्य वर्तमानस्य चानयोः ।
कल्पयोरंतरं यत्र प्रतिसंधिश्च यस्तयोः ।
एतद्वेदितुमिच्छामि यथावत्कुशलो ह्यसि ॥३
कापेयेनैवमुक्तस्तु सूतः प्रवदतां वरः ।
त्रैलोक्यस्योद्भवं कृत्स्नमाख्यातुमुपचक्रमे ॥४
सूत उवाच—अत्र वै वर्णयिष्यामि याथातथ्येन सुव्रताः ।
कल्पं भूतं भविष्यं च प्रतिसंधिश्च यस्तयोः ॥५
मन्वंतराणि कल्पेषु यानि यानि च सुव्रताः ।
यश्चायं वर्तते कल्पो वाराहः सांप्रतः शुभः ॥६
अस्मात्कल्पात्तु यः पूर्वः कल्पोऽतीतः सनातनः ।
तस्य चास्य च कल्पस्य मध्यावस्थां निबोधत ॥७

श्री सूतजी ने कहा—यह प्रकीर्त्ति के लिए प्रथम पाद कीर्त्तित किया है । इसका श्रवण करके कापेय के मन में बहुत ही संहर्ष हुआ था किन्तु उसके मन में संशय भी होता है ।१। उन्होंने वाणी के द्वारा सूतजी की

आराधना की थी और उसका अर्घ तथा दूसरी कथा को श्रवण करने की इच्छा की थी। आज से लेकर कल्पज्ञ प्रति सन्धि कहा जाता है।२। बीत हुए कल्प का और वर्तमान कल्प की इन दोनों का अन्तर और जहाँ पर उन दोनों की प्रतिसन्धि है। यह मैं जानना चाहता हूँ क्योंकि आप ठीक प्रकार से यह बताने के लिए परम कुशल हैं।३। कापेय के द्वारा इस प्रकार से पूछे जाने पर प्रवचन करने वालों में श्रेष्ठ सूतजी ने यह सम्पूण ही करने का उपक्रम किया था।४। श्री सूतजी ने कहा था–हे सुन्दर व्रतों वालो! इस विषय में जो कुछ भी है वह सभी यथार्थ रूप से वर्णन करूँगा। कल्प जो हो गये हैं और आगे होने वाले हैं तथा इन दोनों की जो प्रति सन्धि है–इसको भी बताऊँगा।५। इन कल्पों में जो-जो भी मन्वन्तर है और जो यह कल्प वर्तमान है वह इस समय कल्प परम शुभ वाराह है।६। इस कल्प से पूर्व में होने वाला जो कल्प था जो कि सनातन व्यतीत हो गया है उसकी और इस कल्प की जो मध्य में होने वाली अवस्था है उसका ज्ञान अब प्राप्त करलो।७।

प्रत्यागते पूर्वकल्पे प्रतिसंधि विनाऽनघाः।
अन्यः प्रवर्त्तते कल्पो जनलोकादयः पुनः ॥८
व्युच्छिन्नप्रतिसंधिस्तु कल्पात्कल्पः परस्परम्।
व्युच्छिद्यंते प्रजाः सर्वाः कल्पांते सर्वशस्तदा ॥९
तस्मात्कल्पात्तु कल्पस्य प्रतिसंधिर्न विद्यते।
मन्वंतरे युगाख्यानामविच्छिन्नास्तु संधयः ॥१०
परस्परात् प्रवर्तते मन्वतरयुगैः सह।
उक्ता ये प्रक्रियार्थेन पूर्वकल्पाः समासतः ॥११
तेषां परार्द्धकल्पानां पूर्वो यस्मात्तु यः परः।
आसीत्कल्पे व्यतीते वै परार्द्धात्परमस्तु यः ॥१२
कल्पास्त्वन्ये भविष्या ये ह्यपरार्द्धगुणीकृताः।
प्रथमः सांप्रतस्तेषां कल्पो यो वर्तते द्विजाः ॥१३
अस्मिन्पूर्वे परार्द्धे तु द्वितीयः पर उच्यते।
एष संस्थितकालन्तु प्रत्याहारस्ततः स्मृतः ॥१४

हे अनघो ! प्रतिसन्धि के बिना पूर्वकल्प के प्रत्यागत होने पर अन्य कल्प प्रवृत्त होता है और फिर जन लोकादिक होते हैं ।८। व्युच्छिन्न प्रतिसन्धि वाला कल्प से परस्पर में होता है । उस अवसर पर सभी ओर से कल्प के अन्त में सम्पूर्ण प्रजा व्युच्छिन्न हुआ करती है ।९। उस कल्प से कल्प की प्रतिसन्धि नहीं होती है । मन्वन्तर में युगाख्यों की सन्धियाँ अविच्छिन्न होती हैं ।१०। मन्वन्तर युगों के साथ परस्पर से प्रवृत्त होता है । जो सक्षेप से प्रक्रियार्थ के द्वारा पूर्व कल्प कहे हैं ।११। उन परार्ध कल्पों के पूर्व जिससे जो पर है । पूर्व कल्प के व्यतीत होने पर परार्ध से परम जो था ।१२। जो अन्य भविष्य में होने वाले कल्प हैं वे अपरार्ध गुणी कृत हैं । हे द्विजगणो ! उनमें अब होने वाला कल्प है जो कि इस समय में वर्तमान है ।१३। इसमें पूर्व परार्ध में जो द्वितीय है वह पर कहा जाता है । यह संस्थित काल वाला है और फिर प्रत्याहार कहा गया है ।१४।

अस्मात्कल्पात्ततः पूर्वं कल्पोऽतीतः पुरातनः ।
चतुर्युगसहस्रांते सह मन्वंतरैः पुरा ॥१५
क्षीणे कल्पे ततस्नस्मिन् दाहकाल उपस्थिते ।
तस्मिन्काले तदा देवा आसन्वैमानिकास्तु ये ॥१६
नक्षत्रग्रहताराश्च चन्द्रसूर्यादयस्तु ते ।
अष्टाविंशतिरेवैताः कोट्यस्तु सुकृतात्मनाम् ॥१७
मन्वंतरे यथैकस्मिन् चतुर्दशसु वै तथा ।
त्रीणि कोटिशतान्यासन् कोट्यो द्विनवतिस्तथा ॥१८
अथाधिकासप्ततिश्च सहस्राणां पुरा स्मृता ।
एकैकस्मिंस्तु कल्पे वै देवा वैमानिकाः स्मृताः ॥१९
अथ मन्वंतरेष्वासंश्चतुर्दशसु खे दिवि ।
देवाश्च पितरश्चैव ऋषयोऽमृतपास्तथा ॥२०
तेषामनुचराश्चैव पत्न्यः पुत्रास्तथैव च ।
वर्णाश्रमातिरिक्ताश्च तस्मिन्काले तु खे सुराः ॥२१
तैस्तैः सायुज्यगैः सार्द्धं प्राप्ते वस्तुमये तदा ।
तुल्यनिष्ठाभवन्सर्वे प्राप्ते ह्याभूतसंप्लवे ॥२२

फिर इस कल्प से पूर्व में होने वाला अतीत पुरातन कल्प है जो पहिले एक जहस् चारों युगों की चौकड़ी के अन्त में मन्वन्तरों के साथ है। ।१५। फिर उस कल्प के क्षीण हो जाने पर और दाह काल के उपस्थित होता है। उस समय में तब जो गैमानिक देव हैं वे थे ।१६। वे नक्षत्र-ग्रह और नारायण तथा चन्द्र सूर्य आदिक हैं। वे सब अट्ठाईस हैं। सुकृतात्माओं की करोड़ों की संख्या है अर्थात् जिन्होंने सुकृत् किया है उन्हीं की करोड़ों संख्या है ।१७। जिस प्रकार से एक मन्वन्तर में तथा चौदहों में वे तीन करोड़ थे तथा बानवे करोड़ थे ।१८। इसके अनन्तर अर्थात् विमानों में रहने वाले देवगण कहे गये हैं ।१९। इसके अनन्तर आकाश में दिवलोक में चौदह मन्वन्तरों में थे। उनमें देवगण–पितृगण–ऋषिगण तथा अमृत के पान करने वाले थे ।२०। उनके अनुचर हैं, उनकी पत्नियाँ हैं और उनके पुत्र भी होते हैं। उस काल में आकाश में सुरगण वर्णों और आश्रमों से अतिरिक्त थे। ।२१। उस काल में वस्तुओं से परिपूर्ण प्राप्त होने पर उन-उन सायुज्य में गमन करने वालों के साथ में थे। आभूत संप्लव अर्थात् महा प्रलय के प्राप्त होने पर वे तुल्य निष्ठा वाले हुए थे ।२२।

ततस्तेऽवश्यभावित्वाद् बुद्धयः पर्यायमात्मनः ।
त्रैलोक्यवासिनो देवा इह तानाभिमानिकः ।।२३
स्थितिकाले तदा पूर्ण आसन्ने पश्चिमोत्तरे ।
कल्पावसानिका देवास्तस्मिन्प्राप्ते ह्युपप्लवे ।।२४
तदोत्सुका विषादेन त्यक्तस्थानानि भागशः ।
महर्लोकाय संविग्नास्ततस्ते दधिरे मनः ।।२५
ते युक्तानुपपद्यंते महतीं च शरीरिके ।
विशुद्धिबहुलाः सर्वे मानसीं सिद्धिमास्थिताः ।।२६
तैं कल्पवासिभिः साद्धं महानासादितस्तदा ।
ब्राह्मणैः क्षत्रियैर्वैश्यैस्तद्भवैश्चापरैर्जनैः ।।२७
गत्वा तु ते महर्लोकं देवसंघाश्चतुर्दश ।
ततस्ते जनलोकाय सोद्वेगा दधिरे मनः ।।२८

इसके उपरान्त वे तान के अभिमानी देवगण जो त्रैलोक्य के निवासी थे यहाँ पर आत्मा की बुद्धि के अवश्य भावी होने से थे ।२३। उस काल में

स्थिति का समय पूर्ण हो चुका था और पश्चिमोत्तर में आसन्न था। जो देव कल्प में अवसान प्राप्त होने वाले थे वे उस उपप्लव को प्राप्त हुआ देखने वाले थे।२४। उस अवसर में उत्सुक हुए और विषाद से भागों में स्थानों को व्यक्त करके फिर उन्होंने सविग्न होते हुए अयन भाग महर्लोक के लिए बनाया था।२५। वे युक्तों को उपपन्न होते हैं और शरीर में महती को प्राप्त होते हैं वे सब प्रचर विशुद्धि से समन्वित थे तथा मानसी सिद्धि में समास्थित हुए थे।२६। उस समय में उन कल्पवासियों के साथ महान आसादित हुआ था। उनके साथ में गमन करने वाले ब्राह्मण—क्षत्रिय—वैश्य और अपरजन भी थे। वे चौदह देवों के संघ महर्लोक में प्राप्त हो गये थे। फिर उस महर्लोक से गमन करके बड़े उद्वेग के सहित उन्होंने अपना मन जनलोक में जाने के लिए किया था।२७-२८।

एतेन क्रमयोगेन ययुस्ते कल्पवासिनः ।
एवं देवयुगानां तु सहस्राणि परस्परम् ॥२९
विशुद्धिबहुलाः सर्वे मानसीं सिद्धिमास्थिताः ।
तैः कल्पवासिभिः सार्द्धं जन आसादितस्तु वै ॥३०
तत्र कल्पान्दश स्थित्वा सत्यं गच्छंति वै पुनः ।
गत्वा ते ब्रह्मलोकं वै अपरावर्तिनीं गतिम् ॥३१
आधिपत्यं विमाने वै ऐश्वर्येण तु तत्समाः ।
भवंति ब्रह्मणा तुल्या रूपेण विषयेण च ॥३२
तत्र ते ह्यवतिष्ठंते प्रीतियुक्ताश्च संयमान् ।
आनंदं ब्रह्मणः प्राप्य मुच्यन्ते ब्रह्मणा सह ॥३३
अवश्यभाविनार्थेन प्राकृतेनैव ते स्वयम् ।
मानार्चनाभिः संबद्धास्तदा तत्कालभाविताः ॥३४
स्वपतो बुद्धिपूर्वं तु बोधो भवति वै यथा ।
तथा तु भाविते सेवां तथानंदः प्रवर्तते ॥३५

इसी क्रम के योग से वे कल्पवासी चले गये थे। इस प्रकार से सहस्रों ही देवों के युग थे।२९। सभी विशुद्धि की प्रचुरता वाले थे और अतएव वे सब मानसो सिद्धि में समास्थित थे। उनने कल्प वासियों के साथ जनलोक

को प्राप्त किया था ।३०। वहाँ जनलोक में दश कल्पों तक स्थित होकर फिर सत्य लोक को चले जाते हैं । वे ब्रह्मलोक को प्राप्त करके अपरावर्त्तिनी गति को प्राप्त हो जाते हैं ।३१। वे विमान में आधिपत्य पाकर ऐश्वर्य से उनके ही समान हो जाया करते हैं । फिर वे ब्रह्माजी के ही तुल्य हो जाया करते हैं और रूप तथा विषय के द्वारा ब्रह्मा के समान हैं ।३२। वहाँ पर वे प्रीति से युक्त होते हुए संयमों को अवस्थित हुआ करते हैं । वहाँ पर ब्रह्मा का आनन्द प्राप्त करके ब्रह्माजी के ही साथ मुक्ति को प्राप्त हो जाया करते हैं ।३३। प्राकृत अवश्य भावी अर्थ से वे स्वयं उस समय में उसका से भावित होते हुए सम्मान और अर्चन आदि के द्वारा सम्बद्ध होते हैं ।३४। जिस प्रकार से बुद्धिपूर्वक स्वपन करते हुए बोध होता है उसी भाँति सेवा के भावित होने पर वैसा ही आनन्द प्रवृत्त होता है ।३५।

प्रत्याहारैस्तु भेदानां येषां भिन्नानि शुष्मिणाम् ।
तैः सार्द्धं वर्द्धते तेषां कार्याणि करणानि च ।।३६
नानात्वदर्शिनां तेषां ब्रह्मलोकनिवासिनाम् ।
विनिवृत्ताधिकाराणां स्वेन धर्मेण तिष्ठताम् ।।३७
ते तुल्यलक्षणाः सिद्धाः शुद्धात्मानो निरंजनाः ।
प्राकृते करणोपेताः स्वात्मन्येव व्यवस्थिताः ।।३८
प्रख्यापयित्वा चात्मानं प्रकृतिस्त्वेषु तत्त्वतः ।
पुरुषान्यबहुत्वेन प्रतीता तत्प्रवर्तते ।।३९
प्रवर्तिते पुनः सर्गे तेषां साकारणात्मनाम् ।
संयोगे प्रकृतिर्ज्ञेया मुक्तानां तत्त्वदर्शिनाम् ।।४०
तत्रोपवर्गिणां तेषां न पुनर्मार्गगामिनाम् ।
अभावः पुनरुत्पन्नः शांतानामर्चिषामिव ।।४१
ततस्तेषु गतेषूर्ध्वं त्रैलोक्येषु महात्मसु ।
एतैः सार्द्धं महर्लोकस्तदानासादितस्तु वै ।।४२

जिन शुष्मियों के भेदों के प्रत्याहारों से भिन्न हैं उनके कार्य और करण वर्धित होते हैं ।३६। वे नानात्व के देखने वाले और ब्रह्मलोक के निवास करने वाले हैं । निवृत्त अधिकारों वाले और अपने धर्म में स्थित

रहने वाले हैं ।३७। वे समान लक्षणों वाले सिद्ध हैं शुद्ध आत्माओं वाले तथा निरञ्जन हैं । प्राकृत में वे करणों से उपेत हैं और अपनी आत्मा में ही व्यवस्थित हैं ।३८। और आत्मा को प्रख्यापित करके तात्विक रूप से यह प्रकृति अन्य पुरुषों के बहुत्व होने से प्रतीत होती हुई प्रवृत्त होती है ।३९। साकारणात्मा उनके फिर सर्ग के प्रवर्त्तित होने पर मुक्त तत्व दर्शियों के संयोग में प्रवृति जाननी चाहिए ।४०। वहाँ पर उपवर्गी और फिर मार्गगामी न होने वाले इनका पुनः शान्त अर्चियों के ही समान अभाव उत्पन्न हो गया है ।४१। इसके अनन्तर उन महान् आत्मा वाले त्रैलोकों के ऊपर की ओर गत होने पर उस समय में इनके साथ महर्लोक निश्चय ही आसादित नहीं हुआ था ।४२।

तच्छिष्या वै भविष्यंति कल्पदाह उपस्थिते ।
गंधर्वाद्याः पिशाचाश्च मानुषा ब्राह्मणादयः ।।४३
पशवः पक्षिणश्चैव स्थावराश्च सरीसृपाः ।
तिष्ठत्सु तेषु तत्कालं पृथिवीतलवासिषु ।।४४
सहस्रं यत्तु रश्मीनां स्वयमेव विभाव्यते ।
तत्सप्तरश्मयो भूत्वा एकैको जायते रविः ।।४५
क्रमेणोत्तिष्ठमानास्ते त्रींल्लोकान्प्रदहंत्युत ।
जङ्गमाः स्थावराश्चैव नद्यः सर्वे च पर्वताः ।।४६
शुष्काः पूर्वमनावृष्ट्या सूर्य्यैस्ते च प्रधूपिताः ।
तदा तु विवशाः सर्वे निर्दग्धाः सूर्यरश्मिभिः ।।४७
जङ्गमाः स्थावराश्चैव धर्माधर्मात्मकास्तु वै ।
दग्धदेहास्तदा ते तु धूतपापा युगांतरे ।।४८
ख्यातातपा विनिर्मुक्ताः शुभया चातिबंधया ।
ततस्ते ह्युपपद्यंते तुल्यरूपैर्जनैर्जनाः ।।४९

कल्पदाह के उपस्थित हो जाने पर उनके शिष्य होंगे । जो कि गन्धर्व आदि पिशाच—मानुष और ब्राह्मणादिक हैं ।४३। पशु-पक्षी-स्थावर और सरीसृप हैं । उस समय में पृथ्वी तल में निवास करने वाले उनके स्थित होने पर जो सहस्र किरणें हैं वे स्वयं ही विभावित हो जाया करती हैं । वे

सहस्रों किरणें सात किरणें होकर एक-एक किरण एक-एक सूर्य हो जाता है ।४४-४५। वे सबसे उत्थित होते हुए तीनों लोकों को प्रदग्ध कर देते हैं। उस दाह में चर प्राणी-स्थावर अर्थात् अचर और सब नदियाँ तथा समस्त पर्वत दग्ध होते हैं ।४६। पहिले वृष्टि के अभाव से सभी शुष्क हो जाते हैं और सरसता नाम मात्र को भी कहीं पर नहीं रहती है। इसके पश्चात् वे सब उक्त सूर्यों से जो अतीव प्रखर हैं प्रधूपित होते हैं। उस काल से सभी विवश होकर निर्दग्ध हो जाते हैं और सूर्यों की किरण से जल भुन जाया करते हैं ।४७। जङ्गम और स्थावर जो भी धर्म और अधर्म के स्वरूप वाले हैं, उस समय में उन सके देह प्रदाध होते हैं और अन्ययुग में उनके पाप विनष्ट होकर वे निष्पाप एवं शुद्ध हो जाते हैं ।४८। शुभ अतिबन्ध से वे ख्यातातप विनिर्मुक्त हो जाते हैं। इसके उपरान्त वे जन सब तुल्य रूप वाले जनों के ही साथ में उपपन्न हो जाते हैं ।४९।

उषित्वा रजनीं तत्र ब्रह्मणोऽव्यक्तजन्मनः ।
पुनः सर्गे भवंतीह मानसा ब्रह्मणः सुताः ॥५०
ततस्तेषूपपन्नेषु जनैस्त्रैलोक्यवासिषु ।
निर्दग्धेषु च लोकेषु तदा सूर्यैस्तु सप्तभिः ॥५१
वृष्ट्या क्षितौ प्लावितायां विजनेष्वर्णवेषु च ।
सामुद्राश्चैव मेघाश्च आपः सर्वाश्च पार्थिवाः ॥५२
शरमाणा व्रजंत्येव सलिलाख्यास्तथानुगाः ।
आगतागतिकं चैव यदा तत्सलिलं बहु ॥५३
संछाद्येमां स्थितां भूमिमर्णवाख्यं तदाभवत् ।
आभाति यस्मात् स्वाभासो माशब्दो व्याप्तिदीप्तिषु ॥५४
सर्वतः समनुप्राप्त्या तासां चाम्भो विभाव्यते ।
तदंस्तनुते यस्मात्सर्वां पृथ्वीं समंततः ॥५५
धातुस्तनोति विस्तारे न चैतास्तनवः स्मृताः ।
शर इत्येष शीर्णे तु नानार्थो धातुरुच्यते ॥५६

फिर अव्यक्त जन्म वाले ब्रह्माजी की एक रात्रिपर्यन्त वहाँ निवास करके फिर जब सृष्टि की रचना होती है उसमें वहाँ पर ब्रह्माजी के मानस

अर्थात् मन से ही समुत्पन्न पुत्र होते हैं ।५०। इसके अनन्तर जनों के साथ त्रैलोक्य के निवासी उनके उत्पन्न होने पर और उस समय में उन प्रखरतम सात सूर्यों के द्वारा समस्त लोकों के निर्दग्ध हो जाने पर ।५१। वृष्टि के धारा सम्पात से इस पृथ्वीतल के पूर्णतया प्लावित हो जाने पर, सब समुद्रों के विजन हो जाने पर सब समुद्र-मेघ और सम्पूर्ण जल और सब पार्थिव शीर्ण होते हुए सलिल के नाम पर अनुग होकर गमन किया करते हैं और आगतागतिक जिस समय में बहुत वह जल हो गया था ।५२-५३। उस समय में इस सम्पूर्ण भूमि को संच्छादित करके जो यहाँ पर स्थित थी सभी कुछ एक अर्णव नामधारी हो गया था। जिससे स्व से आभास होने वाला भी शब्द दीप्तियों में व्याप्ति आभात होती है ।५४। सभी ओर उनकी समनु-प्राप्ति से जल ही विभावित होता है। उसके अन्दर जिस कारण से सभी ओर से सम्पूर्ण पृथ्वी को विस्तृत करता है ।५५। विस्तार में धातु विस्तार किया करती है और ये तनु नहीं कहे गये हैं। शीर्ण होने पर शर यह नाना अर्थों वाला धातु कहा जाया करता है ।५६।

एकार्णवे भवत्यापो न शीघ्रास्तेन ते नराः ।
तस्मिन् युगसहस्रान्ते संस्थिते ब्रह्मणोऽहनि ।।५७
तावत्काले रजन्यां च वर्तंत्यां सलिलात्मना ।
ततस्तु सलिले तस्मिन्नष्टाग्नौ पृथ्वीतले ।।५८
प्रशांतवातेऽन्धकारे निरालोके समंततः ।
एतेनाधिष्ठितं हीदं ब्रह्मा स पुरुषः प्रभुः ।।५९
विभागमस्य लोकस्य प्रकर्तुं पुनरैच्छत् ।
एकार्णवे तदा तस्मिन्नष्टे स्थावरजंगमे ।।६०
तदा भवति स ब्रह्मा सहस्राक्षः सहस्रपात् ।
सहस्रशीर्षा पुरुषो रुक्मवर्णो जितेंद्रियः ।
इमं चोदाहरंत्यत्र श्लोकं नारायणं प्रति ।।६१
आपो नारास्तत्तनव इत्यर्था अनुशुश्रुम ।
आपूर्यमाणास्तत्रास्तो तेन नारायणः स्मृतः ।।६२
सहस्रशीर्षा सुमनाः सहस्रपात् सहश्रचक्षुर्वदनः सहस्रकृत् ।
सहस्रबाहुः प्रथमः प्रजापतिस्त्रयीमयोऽयं पुरुषो निरुच्यते ।।६३

एकमात्र अर्णव के होने पर आप शीघ्र नहीं है उससे वे नर हैं। उस एक सहस्र युगों के अन्त में जबकि ब्रह्माजी का दिन संस्थित होता है।५७। उतने समय में सलिल के स्वरूप से रजनी के वर्तमान होने का अवसर रहता है। फिर उस जल मे इस पृथ्वी तल में अग्नि तल में अग्नि बिल्कुल नष्ट हो जाया करती है।५८। उस समय में वायु एकदम प्रशान्त होती है और सभी ओर घोर अन्धकार रहता है तथा सभी ओर आलोक का अभाव रहता है। यह सब इसके ही द्वारा अधिष्ठित रहता है और ब्रह्माजी ही वह प्रभु पुरुष होते हैं।५९। फिर उन्होंने इस लोक के विभाग करने की इच्छा की थी जिस समय में सभी जङ्गम और स्थावर विनष्ट होचुके थे और केवल एक ही अर्णव सभी ओर था।६०। उस अवसर से वे ब्रह्माजी सहस्रों शिरों वाले और सहस्रों पादों वाले होते हैं। वे सहस्रों शिरों वाले पुरुष सुवर्ण के समान वर्ण वाले थे और सब इन्द्रियों पर विजय प्राप्त करने वाले थे। भगवान् नारायण के प्रति यहाँ पर इस श्लोक का उदाहरण दिया करते हैं।६१। आप (जल) जो उसके तनु है—यह अर्थ सुनते हैं। वहाँ पर वे आपूर्य माण हैं—इसलिए नारायण कहे गये हैं।६२। सहस्र शीर्षों से संयुत सुन्दर मन वाले—सहस्र चरणों से युक्त—सहस्र चक्षु और मुखों वाले सहस्र कृत है। सहस्र बाहुओं वाले हैं—ऐसे प्रथम प्रजापति हैं। यह पुरुष त्रयी से परिपूर्ण है—ऐसा कहा जाता है।६३।

आदित्यवर्णो भुवनस्य गोप्ता एको ह्यमूर्तः प्रथमस्त्वसौ
विराट्।
हिरण्यगर्भः पुरुषो महात्मा संपद्यते वै मनसः परस्तात् ॥६४
कल्पादौ रजसोद्रिक्तो ब्रह्मा भूत्वाऽसृजत्प्रभुः।
कल्पांते तमसोद्रिक्तः कालो भूत्वाग्रसत्पुनः ॥६५
स वै नारायणो भूत्वा सत्त्वोद्रिक्तो जलाशये।
त्रिधा विभज्य चात्मानं त्रैलोक्ये संप्रवर्त्तते ॥६६
सृजति ग्रसते चैव वीक्ष्यते च त्रिभिः स्वयम्।
एकार्णवे तदा तस्मिन्नष्टे स्थावरजंगमे ॥६७
चतुर्युगसहस्रान्ते सर्वत. स जलावृते।
ब्रह्मा नारायणाख्यस्तु स काशे च भवे स्वयम् ॥६८

चतुर्विधाः प्रजाः सर्वा ब्रह्मशक्त्या तमोवृताः ।
पश्यंति तं महर्लोके कालं सुप्तं महर्षयः ।।६९
भृग्वादयो यथोद्दिष्टास्तस्मिन् काले महर्षयः ।
सत्यादयस्तथा त्वष्टौ कल्पे लीने महर्षयः ।
तदा विवर्त्यमानैस्तैर्महत्परिगतं पराम् ।।७०

आदित्य के समान वर्ण से युक्त—इस भुवन के रक्षक एक—अमूर्त अर्थात् मूर्त्ति से शून्य यह प्रथम विराट् हैं। हिरण्यगर्भ—महान् आत्मा वाला पुरुष मन से परे सम्पन्न होता है ।६४। कल्प के आदि में रजो गुण से उद्रिक्त होकर प्रभु ब्रह्मा ने सृजन किया था। कल्प का जब अवसान होता है तो उस समय में तमोगुण के उद्रेक से समन्वित काल होकर फिर इस सम्पूर्ण सृष्टि का ग्रसन किया था ।६५। वही फिर भगवान् सत्व के उद्रेक से युक्त नारायण होकर जलाशय में विराजमान रहते हैं। आपने आपको तीन स्वरूपों में विभक्त करके भगवान् तीनों लोकों में सम्प्रवृत्त हुआ करते हैं ।६६। सृजन करते हैं—ग्रसन करते हैं और स्वयं ही तीन रूपों से वीक्षण करते हैं। उस समय में समस्त स्थावर और जङ्गम के नष्ट हो जाने पर जब एकमात्र अर्णव ही विद्यमान रहा करता है ।६७। एक सहस्र चारों युगों की चौकड़ियों का जब अन्त होता है उस समय में वह सभी ओर जल से समावृत होते हैं। उस समय में नारायण नामक वह ब्रह्मा इससे सार में स्वयं प्रकाशित रहते हैं ।६८। सब चारों प्रकार की प्रजा ब्रह्मा की शक्ति से तम से आवृत होती है। महर्षिगण उसको महर्लोक में सोये हुए काल को देखते हैं ।६९। उस काल में यथोद्दिष्ट भृगु आदि महर्षिगण है। उस समय में उनके विवर्त्यमानों के द्वारा महत परिगत होता है ।७०।

गत्यर्थाद्दृषतेर्धातोर्नामनिष्पत्तिरुच्यते ।
यस्माद्दृषति सत्त्वेन महत्तस्मान्महर्षयः ।।७१
महर्लोकस्थितैर्दृष्टः कालः सुप्तस्तदा च तैः ।
सत्त्वाद्याः सप्त ये त्वासन्कल्पेऽतीते महर्षयः ।।७२
एवं ब्रह्मा तासु तासु रजनीषु सहस्रशः ।
दृष्टवन्तस्तदानीताः कालं सुप्तं महर्षयः ।।७३

कल्पस्यादौ सुबहुला यस्मात्संस्थाश्चतुर्दश ।
कल्पयामास वै ब्रह्मा तस्मात्कल्पो निरुच्यते ॥७४
स सृष्टा सर्वभूतानां कल्पादिषु पुनः पुनः ।
व्यक्ताव्यक्तो महादेवस्यस्य सर्वमिदं जगत् ॥७५
इत्येष प्रतिसंबन्धः कीर्तितः कल्पयोर्द्वयोः ।
सांप्रतं हि तयोर्मध्ये प्रागवस्था बभूव ह ॥७६
कीर्तितस्तु समासेन पूर्वकल्पे यथातथम् ।
सांप्रतं संप्रवक्ष्यामि कल्पमेतं निबोधतः ॥७७

गति के अर्थ वाली ऋषिति धातु नाम की निष्पत्ति होती है—ऐसा कहा जाता है। जिससे ऋषिति के सत्व होने से उससे महत है अतएव महर्षि होते हैं ।७१। अहर्लोक में स्थित होते हुए उन्होंने उस समय में सोये हुए काल को देखा था। जो कल्प के व्यतीत होने पर सत्वादि सात महर्षि थे ।७२। इस प्रकार से उन-उन सहस्रों रजनीयों में उस समय में आनीत महर्षियों ने सुप्तकाल को देखा था ।७३। कल्प के आदि में जिससे सुबहुल चौदह संस्था हैं। ब्रह्माजी ने क्योंकि कल्पन किया था इसी कारण से कल्प कहा जाता है ।७४। कल्पों के आदि काल में पुनः पुनः वही समस्त भूतों का सृजन करने वाला है। महादेव व्यक्त है। इसका ही यह सम्पूर्ण जगत है ।७५। वह दोनों कल्पों का प्रति सम्बन्ध कर दिया गया है। इस समय में उन दोनों के मध्य में पूर्व की अवस्था हुई थी ।७६। पूर्व में होने वाले कल्प में ठीक-ठीक कह दिया गया है। इस समय में इस कल्प के विषय में बतलाऊँगा, उसको समझ लीजिए ।७७।

—×—

।। पृथ्वी व्यायाम विस्तरः ।।

सूत उवाच—एवं प्रजासन्निवेशं श्रुत्वा वै शांशपायनिः ।
पप्रच्छ नियतं सूतं पृथिव्युदधिविस्तरम् ॥१
कति द्वीपा समुद्रा वा पर्वता वा कति स्मृताः ।
कियंति चैव वर्षाणि तेषु नद्यश्च काः स्मृताः ॥२
महाभूतप्रमाणं च लोकालोकं तथैव च ।

पर्यायं परिमाणं च गति चन्द्रार्कयोस्तथा ।
एतत्प्रब्रूहि नः सर्वं विस्तरेण यथार्थतः ।।३
सूत उवाच—हंत वोऽहं प्रवक्ष्यामि पृथिव्यायामविस्तरम् ।।४
संख्यां चैव समुद्राणां द्वीपानां चैव विस्तरम् ।
द्वीपभेदसहस्राणि सप्तस्वन्तर्गतानि च ।।५
न शक्यंते क्रमेणेह वक्तुं यैः सततं जगत् ।
सप्त द्वीपान्प्रवक्ष्यामि चन्द्रादित्यग्रहैः सह: ।।६
तेषां मनुष्यास्तर्केण प्रमाणानि प्रचक्षते ।
अचिंत्याः खलु ये भावा न तांस्तर्केण साधयेत् ।।७

श्री सूतजी ने कहा—इस रीति से शांशपायनि ने प्रजा के सन्निवेश का श्रवण करके फिर उसने श्री सूतजी ने नियत रूप से पृथिवी और उदधि के विस्तार के विषय में पूछा था ।१। द्वीप कितने हैं, समुद्र अथवा पर्वत कितने बताये गये हैं ? कितने वर्ष हैं और उन वर्षों में नदियों कौन-कौन बतायी गयी हैं ? ।२। महाभूतों का क्या प्रमाण है तथा लोकालोक प्रमाण क्या है ? चन्द्र और सूर्य का पर्याय-परिमाण और गति क्या हैं ? हे भगवान् ! यह सब आप विस्तार पूर्वक यथार्थ रूप से हमको बतलाइए ।३। श्री सूतजी ने कहा—हर्ष की बात है, मैं आपके सामने पृथ्वी का आयाम और विस्तार बतलाऊँगा ।४। समुद्रों की संख्या और द्वीपों का विस्तार भी बतलाऊँगा । यों तो द्वीपों के सहस्रों भेद होते हैं किन्तु वे भेद सात द्वीपों के सहस्रों भेद होते हैं किन्तु वे सभी भेद सात द्वीपों के ही अन्तर्गत है ।५। जिनके द्वारा निरन्तर यह जगत है वे सब क्रम से यहाँ पर नहीं बताये जा सकते हैं । मैं इस समय में तो आपके समक्ष में सात द्वीपों को ही बताऊँगा और उनके साथ चन्द्र-सूर्य और ग्रहों का वर्णन करूँगा ।६। मानव उनका प्रमाण तर्क के द्वारा कहा करते हैं । किन्तु निश्चित रूप से जो भाव चिन्तन करने के योग्य नहीं हैं उनका तर्क के सहारे साधन कभी नहीं करना चाहिए ।७।

प्रकृतिभ्यः परं यच्च तदचिन्त्यं प्रचक्षते ।
नववर्षं प्रवक्ष्यामि जंबूद्वीपं यथातथम् ।।८

विस्तरान्मण्डलाच्चैव योजनैस्तन्निबोधत ।
शतमेकं सहस्राणां योजनाग्रात्समंततः ॥९
नानाजनपदाकीर्णः पुरैश्च विविधैश्शुभैः ।
सिद्धचारणसंकीर्णः पर्वतैरुपशोभितः ॥१०
सर्वधातुनिबद्धैश्च शिलाजालसमुद्भवैः ।
पर्वतप्रभवाभिश्च नदीभिः सर्वतस्ततः ॥११
जंबूद्वीपः पृथुः श्रीमान् सर्वतः पृथुमंडलः ।
नवभिश्चावृतः सर्वो भुवनैर्भूतभावनैः ॥१२
लवणेन समुद्रेण सर्वतः परिवारितः ।
जंबूद्वीपस्य विस्तारात् समेन तु समंततः ॥१३
प्रागायताः सुपर्वाणः षडिमे वर्षपर्वताः ।
अवगाढा ह्युभयतः समुद्रौ पूर्वपश्चिमौ ॥१४

जो प्रकृतियों से परे हैं वही चिन्तन न करने के योग्य नहीं है—ऐसा कहते हैं। नौ वर्षों से समन्वित जम्बू द्वीप को यथार्थ रूप से बतलाऊँगा ।८। उसको विस्तार से और मण्डल से योजनों के द्वारा समझ लीजिए। योजनाग्र से सभी ओर एक सौ सहस्र है। यह अनेक जनपदों से घिरा हुआ है और विविध परम शुभ नगरों से समन्वित है। यह सिद्धगण और चारणों से समाकीर्ण है और अनेक पर्वतों से उपशोभित है ।९-१०। शिलाओं के समुदायों से समुत्पन्न समस्त धातुओं से निबद्ध यह द्वीप है। इसके सभी ओर अनेक नदियाँ हैं जो पर्वत से उद्भूत हुई हैं ।११। यह जम्बूद्वीप बहुत विशाल है। श्री सम्पन्न है तथा इसका मण्डल भी महान् हैं। भूतों के करने वाले नौ भुवनों से यह सम्पूर्ण समावृत है ।१२। इसके चारों ओर क्षार समुद्र है जिसका भी विस्तार जम्बू द्वीप के विस्तार के ही समान है ।१३। प्रागायत सुपर्वा ये छै वर्ष पर्वत हैं जो दोनों ओर पूर्व और पश्चिम समुद्रों से अवगाढ हैं ।१४।

हिमप्रायश्च हिमवान् हेमकूटश्च हेमवान् ।
सर्वर्तुषु सुखश्चापि निषधः पर्वतो महान् ॥१५
चतुर्वर्णश्च सौवर्णो मरुश्चारुतमः स्मृतः ।

द्वात्रिंशच्च सहस्राणि विस्तीर्णः स च मूर्द्धनि ॥१६
वृत्ताकृतिप्रमाणश्च चतुरस्रः समुच्छ्रितः।
नानावर्णास्तु पार्श्वेषु प्रजापतिगुणान्वितः ॥१७
नाभिबंधनसंभूतो ब्रह्मणोऽव्यक्तजन्मनः।
पूर्वतः श्वेतवर्णश्च ब्राह्मणस्तस्य तेन तत् ॥१८
पार्श्वमुत्तरतस्तस्य रक्तवर्णः स्वभावतः।
तेनास्य क्षत्त्रभावस्तु मेरोर्नानार्थकारणात् ॥१९
पीतश्च दक्षिणेनासौ तेन वैश्यत्वमिष्यते।
भृंगपत्त्रनिभश्चापि पश्चिमेन समाचितः ॥२०
तेनास्य शूद्रभावः स्यादिति वर्णाः प्रकीर्त्तिताः।
वृत्तः स्वभावतः प्रोक्तो वर्णतः परिमाणतः ॥२१

हिमवान् गिरि में प्रायः हिम समूह होता है और हेमकूट पर्वत हेम से संयुत है। निषध एक महान पर्वत है जो सभी ऋतुओं में सुखदायी होता है ।१५। मरु पर्वत चार वर्णों वाला है और सुवर्ण से युक्त है यह अधिक सुन्दर कहा गया है और मूर्धा में बत्तीस सहस्र योजनों के विस्तार वाला है ।१६। यह वृत्त आकृति और प्रमाण वाला है तथा चौकोर और समुच्छित अर्थात् ऊँचा है। इसके पार्श्व भागों में अनेक वर्ण हैं तथा यह प्रजापति के गुणों से संयुत है ।१७। अव्यक्त जन्म वाले ब्रह्माजी के नाभिबन्धन से यह समुत्पन्न हुआ है। उसके पूर्व की ओर यह श्वेत वर्ण वाला है इससे ब्राह्मण है ।१८। उत्तर की ओर पार्श्वभाग उसका स्वभाव से ही रक्तवर्ण है। इस कारण से मेरु के अनेक अर्थ कारण से इसका क्षत्र भाव है ।१९। यह दक्षिण दिशा की ओर पीत है इससे इसका वैश्यभाव अभीष्ट होता है। पश्चिम की ओर पीत है इससे इसका वैश्यभाव अभीष्ट होता है। पश्चिम की ओर यह भृङ्गपत्र के सदृश समाचित है ।२०। इस कारण से इसका शूद्रभाव होता है—इस तरह से इसके चार वर्ण कहे गये हैं। यह स्वभाव से वृत्त कहा है और वर्ण तथा परिमाण से भी बताया गया है ।२१।

नीलश्च वैदूर्यमयः श्वेतः शुक्लो हिरण्मयः।
मयूरबर्हवर्णस्तु शातकौंभश्च शृंगवान् ॥२२

एते पर्वतराजानः सिद्धचारणसेविताः ।
तेषामंतरविष्कंभो नवसाहस्र उच्यते ॥२३
मध्ये त्विलावृतं नाम महामेरोः समंततः ।
नवैवं तु सहस्राणि विस्तीर्णं सर्वतस्तु तत् ॥२४
मध्ये तस्य महामेरुर्विधूम इव पावकः ।
वेद्यर्द्धं दक्षिणं मेरोरुत्तरार्द्धं तथोत्तरम् ॥२५
वर्षाणि यानि षट् चैव तेषां ये वर्षपर्वताः ।
द्वे द्वे सहस्रे विस्तीर्णा योजनानां समुच्छ्रयात् ॥२६
जंबूद्वीपस्य विस्तारात्तेषामायाम उच्यते ।
योजनानां सहस्राणि शतं द्वावायतौ गिरी ॥२७
नीलश्च निषधश्चैव ताभ्यां हीनास्तु ये परे ।
श्वेतश्च हेमकूटश्च हिमवाञ्छृंगवांस्तथा ॥२८

नील—वैदूर्यमय—श्वेत—हिरण्मय—मोर के वर्हण के वर्ण वाला और शातकौम्भ तथा शृङ्गवान् है ।२२। ये सब पर्वतों के शिरोमणि राजा पर्वत हैं जो कि सिद्धों और चारणों के द्वारा सेवित रहा करते हैं अर्थात् इनमें सिद्ध और चारण निवास किया करते हैं। उनका अन्तर निष्कम्भ नौ सहस्र योजन कहा जाता है ।२३। मध्य में इलावृत नाम वाला गिरि है जो महामेरु के समंतम है। यह भी इसी प्रकार से नौ सहस्र ही सब ओर से विस्तार वाला है ।२४। इसके मध्य में महा है जो धूम से रहित अग्नि के समान देदीप्यमान है। मेरु के वेदी का अर्ध दक्षिण है तथा उत्तर अर्ध भाग उत्तर है ।२५। जो छै वर्ण हैं उनके जो वर्ष पर्वत हैं ऊँचाई से दो-दो सहस्र योजन विस्तीर्ण हैं ।२६। जम्बू द्वीप के विस्तार से उनका आयाम कहा जाता है। वो गिरि सौ सहस्र योजन आयत हैं ।२७। नील और निषध उन दोनों से जो दूसरे हैं वे हीन हैं। श्वेत—हेमकूट—हिमवान् तथा शृङ्गवान् हैं ।२८।

नवती द्वे अशीती द्वे सहस्राण्यायतास्तु तैः ।
तेषां मध्ये जनपदास्तानि वर्षाणि सप्त वै ॥२९
प्रपाताविषमैस्तैस्तु पर्वतैरावृतानि तु ।

संततानि नदीभेदैरगम्यानि परस्परम् ॥३०
वसंति तेषु सत्त्वानि नानाजातीनि सर्वशः ।
इदं हैमवतं वर्षं भारतं नाम विश्रुतम् ॥३१
हेमकूटं परं ह्यस्मान्नाम्ना किंपुरुषं स्मृतम् ।
नैषधं हेमकूटात्तु हरिवर्षं तदुच्यते ॥३२
हरिवर्षात्परं चापि मेरोश्च तदिलावृतम् ।
इलावृतात्परं नीलं रम्यकं नाम विश्रुतम् ॥३३
रम्यकात्परतः श्वेतं विश्रुतं तद्धिरण्मयम् ।
हिरण्मयात्परं चैव शृंगवत्तः कुरु स्मृतम् ॥३४
धनुः संस्थे तु विज्ञेये द्वे वर्षे दक्षिणोत्तरे ।
दीर्घाणि तत्र चत्वारि मध्यमं तदिलावृतम् ॥३५

उनसे दो सहस्र नब्बे और दो सहस्र अस्सी आयत हैं। उनके मध्य में जनपद हैं वे सात वर्ष है ।२९। उन प्रपातों से विषम पर्वतों से वे हैं। निरन्तर बहने वाली नदियों के बहुत से भेदों से वे परस्पर में गमन करने के अयोग्य है ।३०। उनमें अनेक जातियों वाले जीव निवास करते हैं और सभी ओर वे वहाँ रहा करते हैं। यह हैमवत वर्ष है जो भारत—इस नाम से प्रसिद्ध है ।३१। इससे आगे हेमकूट है जो नाम से किम्पुरुष कहा गया है। हेमकूट से आगे नैषध है जो हरि वर्ष कहा जाया करता है ।३२। हरिवर्ष से परे मेरु का वह इलावृत है। इलावृत से आगे नील है जो रम्यक नाम से विख्यात है ।३३। रम्यक से आगे श्वेत है जो हिरण्मय नाम से विश्रुत है। हिरण्मय से आगे शृङ्गवत् हैं जो कुरु कहा गया है ।३४। दक्षिण और उत्तर दिशा में धनुःसंस्थ दो वर्ष जानने चाहिए। वहाँ पर चार दीर्घ है जो मध्यम है वह इलावृत है ।३५।

अर्वाक् च निषधस्याथ वेद्यर्द्धं दक्षिणं स्मृतम् ।
परं नीलवतो यच्च वेद्यर्द्धं तु तदुत्तरम् ॥३६
वेद्यर्द्धे दक्षिणे त्रीणि त्रीणि वर्षाणि चोत्तरे ।
तयोर्मध्ये तु विज्ञेयो मेरुर्मध्य इलावृतम् ॥३७
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ।

उदगायतो महाशैलो माल्यवान्नाम नामतः ॥३८
योजनानां सहस्रं तु आनील निषधायतः ।
आयामतश्चतुस्त्रिंशत्सहस्राणि प्रकीर्तितः ॥३९
तस्य प्रतीच्यां विज्ञेयः पर्वतो गंधमादनः ।
आयातमतोऽथ विस्तारान्माल्यवानिति विश्रुतः ॥४०
परिमंडलयोर्मेरुर्मध्ये कनकपर्वतः ।
चतुर्वर्णः स सौवर्णः चतुरस्रः समुच्छ्रितः ॥४१
सुमेरुः शुशुभे शुभ्रो राजवत्समधिष्ठितः ।
तरुणादित्यवर्णाभो विधूम इव पावकः ॥४२

इसके अनन्तर निषध के नीचे वेदी के अर्धभाग दक्षिण कहा गया है। नीलवान् है और जो वेद्यर्ध है वह उत्तर है ।३६। वेद्यर्ध दक्षिण और उत्तर में तीन-तीन वर्ष है। उन दोनों के मध्य में मेरु जानना चाहिए और मध्य में इलावृत है ।३७। नील के दक्षिण दिशा की ओर और निषध की उत्तर की ओर—उत्तर की ओर आयत एक महान् शैल है जो नाम से माल्यवान कहा जाता है ।३८। एक सहस्र योजन नील और निषध तक आयत है और आयाम से यह चौबीस सहस्र योजन कहा गया है ।३९। इसके पश्चिम में गन्धमादन नामक पर्वत जानने के योग्य है। आयाम (चौड़ाई) और विस्तार से माल्यवान्—इस नाम से यह प्रसिद्ध है ।४०। परिमण्डलों के मध्य में मेरु पर्वत है जो कनक पर्वत है। वह चार वर्णों वाला और सुवर्ण का तथा चतुरस्र अर्थात् चौकोर समुच्छ्रित है ।४१। सुमेरु शोभाशाली होता था जो पास शुभ्र है और एक राजा के ही समान समधिष्ठित रहता है। इसके वर्ण की आभा तरुण सूर्य के ही समान है तथा बिना धुँआ वाली अग्नि के तुल्य है ।४२।

योजनानां सहस्राणि चतुरशीतिरुच्छ्रितः ।
प्रविष्टः षोडशाधस्ताद्विस्तृतः षोडशैव तु ॥४३
शरावसंस्थितत्वात्तु द्वात्रिंशन्मूर्ध्नि विस्तृतः ।
विस्तारात्त्रिगुणस्तस्य परिणाहः समंततः ॥४४
मंडलेन प्रमाणेन व्यस्रं मानं तदिष्यते ।

चत्वारिंशत्सहस्राणि योजनानां समंततः ॥४५
अष्टाभिरधिकानि स्युस्त्र्यस्रे मानं प्रकीर्त्तितम् ।
चतुरस्रेण मानेन परिणाहः समंततः ॥४६
चतुःषष्टिसहस्राणि योजनानां विधीयते ।
स पर्वतो महादिव्यो दिव्यौषधिसमन्वितः ॥४७
भुवनैरावृतः सर्वो जातरूपमयैः शुभैः ।
तत्र देवगणाः सर्वे गंधर्वोरगराक्षसाः ॥४८
शैलराजे प्रदृश्यंते शुभाश्चाप्सरसां गणाः ।
स तु मेरुः परिवृतो भुवनैर्भूतभावनैः ॥४९

वह चौरासी सहस्र योजन ऊँचा है। एक योजन चार कोस का होता है। सोलह योजन नीचे की ओर प्रविष्ट है और सोलह ही भोजन विस्तार वाला है ।४३। शराव संस्थित होने से बसीस योजन मूर्धा में विस्तृत है। विस्तार मे सभी ओर उसका तिगुना परिणाम है ।४४। मण्डल प्रमाण से उसका मान त्र्यस्र अभीष्ट होता है। सब ओर चौवालीस सहस्र योजन है ।४५। त्र्यस्र में अर्थात् तीनों ओर में उसका मान आठ अधिक योजन कहा गया है। सभी ओर चतुरस्र मान से परिणाम होता है ।४६। चौंसठ सहस्र योजन कहा जाता है। वह पर्वत बहुत ही अधिक दिव्य है और दिव्य औषधियों से समन्वित है ।४७। यह सम्पूर्ण सुवर्णमय परम शुभ भुवनों से घिरा हुआ है। वहाँ पर समस्त देवों के गण—गन्धर्व—और राक्षस निवास दिया करते हैं ।४८। उस शैलों के राजा के ऊपर शुभ अप्सराओं के समुदाय भी दिखलाई दिया करते हैं। वह मेरु पर्वत भूतों के भावन भुवनों से परिवृत रहा करता है ।४९।

चत्वारो यस्य देशा वै चतुः पार्श्वेष्वधिष्ठिताः ।
भद्राश्वा भरताश्चैव केतुमालाश्च पश्चिमाः ॥५०
उत्तराः कुरवश्चैव कृतपुण्यप्रतिश्रयाः ।
गंधमादनपार्श्वे तु परैषाऽपरगंडिका ॥५१
सर्वर्त्तुरमणीया च नित्यं प्रमुदिता शिवा ।
द्वात्रिंशत्तु सहस्राणि योजनैः पूर्वपश्चिमात् ॥५२

आयामतश्चतुस्त्रिंशत्सहस्राणि प्रमाणतः ।
तत्र ते शुभकर्माणः केतुमालाः प्रतिष्ठिताः ॥५३
तत्र काला नराः सर्वे महासत्त्वा महाबलाः ।
स्त्रियश्चोत्पलपत्राभाः सर्वास्ताः प्रियदर्शनाः ॥५४
तत्र दिव्यो महावृक्षः पनसः सड्रसाश्रयः ।
ईश्वरो ब्रह्मणः पुत्रः कामचारी मनोजवः ॥५५
तस्य पीत्वा फलरसं जीवंति च समायुतम् ।
पार्श्वे माल्यवतश्चापि पूर्वेऽपूर्वा तु गंडिका ॥५६

जिसके चार देश हैं जो चारों पार्श्वों में समधिष्ठित हैं। जिनके नाम भद्राश्व—भरत—केतुपाल और पश्चिम है ।५०। उत्तर और कुरु कृतपुण्य प्रतिश्रय हैं। गन्धमादन के पार्श्व में तो यह पर अपर गण्डिका है ।५१। ये सभी ऋतुओं में परम रमणीय हैं और नित्य ही प्रमुदित तथा शिव हैं। पूर्व और पश्चिम से बत्तीस सहस्र योजनों से युक्त हैं ।५२। प्रमाण से इनका आयाम चौंतीस सहस्र योजनों वाला है। वहाँ पर वे परम शुभ कर्मों वाले केतुमाल देश प्रतिष्ठित है ।५३। वहाँ पर जब नर काल हैं जो महान् सत्व वाले और महान् बल से सम्पन्न है और वहाँ की स्त्रियाँ कमलदल की आभा वाली तथा देखने में बहुत प्रिय लगती हैं ।५४। वहाँ पर एक बहुत ही उत्तम पनस का महान वृक्ष है जिसमें छैरस विद्यमान रहा करते हैं। उसकी स्वामी ब्रह्मा का पुत्र कामना से चरण करने वाले मनोजव है ।५५। वहाँ पर समायुत काल पर्यन्त उसके फलों का रस का पान करके प्राणी जीवित रहा करते हैं। पूर्व में माल्यवान् के पार्श्व में एक अपूर्व गण्डिका है ।५६।

—×—

॥ भारतदेश ॥

सूत उवाच—एवमेव तिसर्गो वै वर्षाणां भारते शुभे ।
दृष्टः परमतत्त्वज्ञैर्भूय किं वर्णयामि वः ॥१
ऋषिरुवाच—यदिदं भारतं वर्षं यस्मिन्स्वायंभुवादयः ।
चतुर्दशैते मनवः प्रसासर्गेऽभवन्पुनः ॥२

एतद्वेदितुमिच्छामस्तन्नो निगद सत्तम ।
एतच्छ्रुतवचस्तेषामब्रवीद्रोमहर्षणः ॥३
अत्र वो वर्णयिष्यामि वर्षेऽस्मिन् भारते प्रजाः ।
इद तु मध्यमं चित्रं शुभाशुभफलोदयम् ॥४
उत्तरं यत्समुद्रस्य हिमवद्दक्षिणं च यत् ।
वर्षं तद्भारतं नाम यत्रेयं भारती प्रजा ॥५
भरणाच्च प्रजानां वै मनुर्भरत उच्यते ।
निरुक्तवचनाच्चैवं वर्षं तद्भारतं स्मृतम् ॥६
इतः स्वर्गश्च मोक्षश्च मध्यश्चांतश्च गम्यते ।
न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते ॥७

श्रीसूतजी ने कहा—इस प्रकार से ही परम शुभ भारत में वर्षों का निसर्ग है जो कि परम तत्वों के ज्ञाताओं के द्वारा देखा गया है। अब फिर आपके सामने मैं क्या वर्णन करूँ ? ।१। ऋषि ने कहा—जो यह भारतवर्ष है जिसमें ये चौदह स्वायम्भुव आदि मनुगण फिर प्रजा के सृजन करने में थे ।२। हे श्रेष्ठ पुरुषों में परमोत्तम ! हम लोग यही जानने की इच्छा करते हैं। वही आप हमारे समक्ष में वर्णन कीजिए। रोम हर्षणजी ने उन ऋषियों के इस वचन का श्रवण करके कहा था ।३। यहाँ पर इस भारतवर्ष में आप लोगों के सामने जो प्रजा हुई थी उनका मैं वर्णन करूँगा। यह तो मध्यम चित्र है जो शुभ और अशुभ फलों के उदय वाला है ।४। समुद्र के उत्तर में और हिमवान् के दक्षिण में है वह भारत नाम वाला वर्ष है जहाँ पर यह भारत की प्रजा है ।५। प्रजाओं के भरण करने से भरत मनु कहा जाया करते हैं। इसी निरुक्ति के वचन से यह वर्ष भारत—इस नाम से कहे गया है। यहाँ से स्वर्ग होता है और यहाँ से ही बारम्बार जीवन-मरण के आवागमन से मुक्त हुआ करता है और मध्य तथा अन्त का ज्ञान मनुष्यों का कर्म करने का क्षेत्र नहीं है अर्थात् कर्म करने की भूमि यही देश है ।६-७।

भारतस्यास्य वर्षस्य नव भेदान्निबोधत ।
समुद्रांतरिता ज्ञेयास्ते त्वगम्याः परस्परम् ॥८

इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गांधर्वस्त्वथ वारुणः ॥९

अयं तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरात् ॥१०

आयतो ह्याकुमार्य्या वै चागंगाप्रभवाच्च वै ।
तिर्यगुत्तरविस्तीर्णः सहस्राणि नवैव तु ॥११

द्वीपो ह्युपनिविष्टोऽयं म्लेच्छैरंतेषु सर्वशः ।
पूर्वे किराता ह्यस्यांते पश्चिमे यवनाः स्मृताः ॥१२

ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः ।
इज्यायुधवणिज्याभिर्वर्त्तयंतो व्यवस्थिताः ॥१३

तेषां संव्यवहारोऽत्र वर्त्तते वै परस्परम् ।
धर्मार्थकामसंयुक्तो वर्णानां तु स्वकर्मसु ॥१४

इस भारत वर्ष के नौ भेद हैं उनको आप लोग भली-भाँति समझ लीजिए ? वे सब समुद्र से अन्तरित हैं—ऐसे ही जान लेने चाहिए और परस्पर में वे सब अगम्य हैं अर्थात् अज्ञेय एवं गमन न करने के योग्य है ।८। उनके नाम ये हैं—इन्द्रद्वीप—कशेरुमान्—ताम्रवर्ण—गभस्तिमान्—नाग द्वीप—सौम्य—गन्धर्व—वारुण ।९। यह नौवाँ उन द्वीपों में है जो सागर से संवृत है । यह द्वीप दक्षिण-उत्तर से एक सहस्र योजन है ।१०। भागीरथी गङ्गा के उद्गम स्थान से कन्या कुमारी तक यह आयत है । नौ सहस्र योजन तिरछा अत्तर की ओर विस्तीर्ण है ।११। यह द्वीप अन्तों में सभी ओर म्लेच्छों द्वारा उपनिविष्ट है । इसके अन्त में पूर्व में किरात रहा करते हैं और पश्चिम में यवन लोग वाले बताये गये हैं ।१२। मध्य के भागों में ब्राह्मण—क्षत्रिय—वैश्य और शूद्र निवास करते हैं। जो यज्ञार्चन—शस्त्र—प्रयोग—वाणिज्य से अभिवर्त्तन करते हुए व्यवस्थित हैं ।१३। यहाँ पर इन चारों वर्णों में परस्पर में समाचीन व्यवहार रहा करता है । अपने वर्ण के अनुसार जो इनके अपने कर्म हैं उन्हीं में यह व्यवहार धर्म अर्थ और काम से समन्वित होता है ।१४।

संकल्पः पंचमानां च ह्याश्रमाणां यथादिधि ।
इह स्वर्गापवर्गार्थं प्रवृत्तिर्येषु मानुषी ॥१५
यस्त्वयं नवमो द्वीपस्तिर्यगायाम उच्यते ।
कृत्स्नं जयति यो ह्येनं सम्राडित्यभिधीयते ॥१६
अयं लोकस्तु वै सम्राडंतरिक्षं विराट् स्मृतम् ।
स्वराडसौ स्मृतो लोकः पुनर्वक्ष्यामि विस्तरात् ॥१७
सप्तैवास्मिन्सुपर्वाणो विश्रुताः कुलपर्वताः ।
तेषां सहस्रशश्चान्ये पर्वतास्तु समीपगाः ॥१८
अविज्ञाता. सारवंतो विपुलाश्चित्रसानवः ।
मंदरः पर्वतश्रेष्ठो वैहारो दुर्दुरस्तथा ॥२०
कोलाहलः ससुरसो मैनाको वैद्युतस्तथा ।
वातंधमो नागगिरिस्तथा पाण्डुरपर्वतः ॥२१

पंचमान इस आश्रमों के सङ्कल्प विधि के ही अनुसार होता है । वहाँ पर जिनमें स्वर्ग प्राप्ति और मोक्ष के लिये मानुषी प्रवृत्ति रहा करती है । ।१५। जो यह नवम द्वीप है वह तिर्यंग् आयाम वाला कहा जाता है । इस सम्पूर्ण द्वीप पर अपने बल-विक्रम के द्वारा विजय प्राप्त कर लेता है वह यहाँ का सम्राट् चक्रवर्ती राजा के नाम से कहा जाया करता है ।१६। यह लोक तो सम्राट है और अन्तरिक्ष विराट् कहा गया है । यह लोक स्वराट् कहा गया है । मैं फिर विस्तार के साथ बतलाऊँगा ।१७। इस द्वीप में सुपर्व सात ही कुल पर्वत प्रसिद्ध हैं । महेन्द्र---मलय---सह्य---शुक्तिमान---ऋक्ष पर्वत---विन्ध्य और पारियात्र ये ही सात कुश पर्वत है । इनके समीप में रहने वाले अन्य भी सहस्रों पर्वत हैं ।१८-१९। बहुत से पर्वतों का ज्ञान ही नहीं है और वे सार सम्पन्न तथा विचित्र शिखरों वाले हैं । पर्वतों में परम श्रेष्ठ मन्दर---वैहार-दुर्दुर-कोलाहल---समुरस---मैनाक---वैद्युत---वातंधम---नागगिरि और पाण्डुर पर्वत हैं ।२०-२१।

तुंगप्रस्थः कृष्णगिरिर्गोधनो गिरिरेव च ।
पुष्पगिर्युज्जयंतौ च शैलो रैवतकस्तथा ॥२२
श्रीपर्वतश्चित्रकूटः कूटशैलो गिरिस्तथा ।

अन्ये तेभ्योऽपरिज्ञाता ह्रस्वाः स्वल्पोपजीविनः ॥२३
तैर्विमिश्रा जनपदा आर्या म्लेच्छाश्च भागशः ।
पीयंते यैरिमा नद्यो गंगा सिंधुः सरस्वती ॥२४
शतद्रुश्चंद्रभागा च यमुना सरयूस्तथा ।
इरावती वितस्ता च विपाशा देविका कुहूः ॥२५
गोमती धूतपापा च बुद्बुदा च दृषद्वती ।
कौशिकी त्रिदिवा चैत्र निष्ठीवी गंडकी तथा ॥२६
चक्षुर्लोहित इत्येता हिमवत्पादनिस्सृताः ।
वेदस्मृतिर्गेदवती वृत्रघ्नी सिंधुरेव ॥२७
कर्णाशा नंदना चैव सदानीरा महानदी ।
पाशा चर्मण्वतीनूपा विदिशा वेत्रवत्यपि ॥२८

तुङ्गप्रस्थ—कृष्णगिरि—गोधनगिरि—पुष्प गिरि—उज्जयन्त तथा श्वेतक शैल है ।२२। श्री पर्वत—चित्रकूट—कूट शैलगिरि हैं। उनसे भी अन्य छोटे-छोटे गिरि हैं जो भली-भांति परिज्ञात नहीं है और स्वल्पोप जीवी है ।२३। उन शैलों से मिले-जुले जनपद यह भी हैं जिनके भागों में आर्य तथा म्लेच्छ निवास किया करते हैं जिनके द्वारा इन नदियों का पान किया जाया करता है। उन नदियों के कुछ नामों का परिगणन किया जाता है जैसे—गङ्गा—सिन्धु—और सरस्वती हैं ।२४। शतद्रु—चन्द्रभागा—जमुना—सरयू—इरावती—वितस्ता—विपाशा—देविका—कुहू है ।२५। गोमती—धूतपापा—बुद्बुदा—दृषद्वती—कौशिकी—त्रिदिवा—निष्ठीवी—गण्डकी—चक्षु—लोहित—ये सब नदियाँ हिमवान् महाशैल के पाद से निकली हैं। वेदस्मृति—वेदवती—वृत्रघ्नी और सिन्धु है । वर्णाशा—नन्दना—सदानीरा—महानदी—पाशा—चर्मण्वती—नूपा—विदिशा—वेत्रवती है ।२६-२८।

क्षिप्रा ह्यवंति च तथा पारियात्राश्रयाः स्मृताः ।
शोणो महानदश्चैव नर्म्मदा सुरसा क्रिया ॥२९
मंदाकिनी दशार्णा च चित्रकूटा तथैव च ।
तमसा पिप्पला श्येना करमोदा पिशाचिका ॥३०
चित्रोपला विशाला च बंजुला वास्तुवाहिनी ।

सनेरुजा शुक्तिमती मंकुती त्रिदिवा क्रतुः ॥३१
ऋक्षवत्संप्रसूतास्ता नद्यो मणिजलाः शिवाः ।
तापी पयोष्णी निर्विंध्या सृपा च निषधा नदी ॥३२
वेणी गैतरणी चैव क्षिप्रा वाला कुमुद्वती ।
तोया चैव महागौरी दुर्गा वान्नशिला तथा ॥३३
विंध्यपादप्रसूतास्ता नद्यः पुण्यजलाः शुभाः ।
गोदावरी भीमरथी कृष्णवेणाथ बंजुला ॥३४
तुंगभद्रा सुप्रयोगा वाह्या कावेर्यथापि च ।
दक्षिणप्रवहा नद्यः सह्यपादाद्विनिः स्मृताः ॥३५

क्षिप्रा और अवन्ति ये नदियाँ पारिमात्र के समाश्रय वाली हैं—ऐसा कहा गया है—शोण महानन्द हैं। सुरसा–नर्मदा–क्रिया–मन्दाकिनी दशार्णा—चित्रकूटा–नमसा–पिप्पला–श्येना–करमोदा और पिशाचिका—ये नदियाँ हैं ।२९-३०। चित्रोपला—विशाला—वंजुला—वास्तुवाहिनी—सनेरुजा–शुक्तिमती–मंकुती–त्रिदिवा–क्रतु नदियाँ हैं ।३१। ये सब ऋक्ष वत्स पर्वत से संभूत होने वाली हैं जिनका जल मणि के समान परम स्वच्छ और शिव है। तापी–पयोष्णी–निर्विन्ध्या—सृपा और निषधा नदी हैं ।३२। वेणी–गैतरणी–वाला–कुमुद्वती–तोया–महागौरी–दुर्गा-वान्नशिला नदियाँ हैं ।३३। ये सब नदियां विन्ध्य गिरि के पाद से प्रसूत होने वाली हैं जिनका जल परम पुण्यमय ह और जो बहुत ही शुभ है। गोदावरी-भीमरथी-कृष्णवेणा-बंजुला-तुङ्गभद्रा-सुप्रयोगा-वाह्या-काबेरी—ये नदियाँ दक्षिणा की ओर प्रवाह करने वाली हैं और महा गिरि के पाद से निकलने वाली हैं ।३४-३५।

कृतमाला ताम्रपर्णी पुष्पजात्युत्पलावती ।
नद्योऽभिजाता मलयात्सर्वाः शीतजलाः शुभाः ॥३६
त्रिसामा ऋषिकुल्या च बंजुला त्रिदिवाबला ।
लांगूलिनी वंशधरा महेन्द्रतनयाः स्मृताः ॥३७
ऋषिकुल्या कुमारी च मंदगा मंदगामिनी ।
कृपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः ॥३८

तास्तु नद्यः सरस्वत्यः सर्वा गंगाः समुद्रगाः ।
विश्वस्य मातरः सर्वा जगत्पापहराः स्मृताः ॥३९
तासां नद्युपनद्योऽन्याः शतशोऽथ सहस्रशः ।
तास्विमे कुरुपांचालाः शाम्वा माद्रेयजांगलाः ॥४०
शूरसेना भद्रकारा बोधाः सहपटच्चराः ।
मत्स्याः कुशल्याः सौशल्याः कुंतलाः काशिकोशलाः ॥४१
गोधा भद्राः कलिंगाश्च मागधाश्चोत्कलैः सह ।
मध्यदेश्या जनपदाः प्रायशस्तत्र कीर्त्तिताः ॥४२

कृतमाला-ताम्रहर्णी-पुष्पजाती-उत्पलावती—ये जब नदियां मलय पर्वत से अभिजात हुई हैं जिनका जल बहुत ही शीतल और शुभ है ।३६। त्रिसामा-ऋषिकुल्या-बंजुला-त्रिदिवा-बला-लांगूलिनी-वंशधरा-ये सब महेन्द्र-गिरि की तनया कही गयी हैं ।३७। ऋषिकुल्या-मन्दगा-मन्द गामिनी-कृपा-पलाशिनी—ये नदियां शुक्तिमान् पर्वत से समुत्पत्ति पाने वाली है ।३८। ये सब नदियां सरस्वती हैं और सब समुद्र में गमन करने वाली गङ्गा है । ये सभी इस विश्व की मालायें है और जगत् के समस्त पापों के हरण करने वाली कही गयी हैं ।२९। इन सब नदियों की अन्य सैंकड़ों और हजारों ही उप नदियां हैं । उनमें ये कुरु पाञ्चाल-शाल्व-माद्रय-जांगल-शूरसेन-भद्रकार-बोध-सहपटच्चर-मत्स्य कुशल्य-कुन्तल-काशि-कौशल-गोध-भद्र-कलिंग-मागध-उत्कल-मध्य देश में होने वाले जनपद प्रायः करके वहाँ पर कीर्त्तित किये गये हैं ।४०-४२।

सह्यस्य चोत्तरांतेषु यत्र गोदावरी नदी ।
पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः ॥४३
तत्र गोवर्द्धनं नाम पुरं रामेण निर्मितम् ।
रामप्रियाय स्वर्गीया वृक्षा दिव्यास्तथौषधीः ॥४४
भरद्वाजेन मुनिना तत्प्रियार्थेऽवरोपिताः ।
अतः पुरवरोद्देशस्तेन जज्ञे मनोरमः ॥४५
वाह्लीका वाटधानाश्च आभीरा कालतोयकाः ।
अपरांताश्च सुह्माश्च पाञ्चालाश्चर्ममंडलाः ॥४६

पंड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च ।
सेतुका मूषिकाश्चैव क्षपणा वनवासिकाः ॥५६

अत्रिगण-भरद्वाज-प्रस्थल-दशेरक-लमक-तालशाल-भूषिक-ईजिक-ये सब उत्तर दिशा में हैं। अब जो पूर्व दिशा में देश हैं उनका भी आप ज्ञान प्राप्त कर लीजिए। अङ्ग-दङ्ग-चोल भद्र-किरातों की जातियाँ-तोमर-हंसभंग-काश्मीर-तंगण-झिल्लिक-आहुक-हूणदर्व-अन्ध्रगक-मुद्गर अन्तर्गिरि-बहिर्गिरि —इसके अनन्तर प्लवङ्गव-मलद और मलवर्त्तिक जानने के योग्य हैं। ।५०-५३। समंतर-प्रावृषेय-भार्गव-गोपपार्थिव-प्राग्ज्योतिष-पुण्ड्र-विदेह-ताम्रलिप्तिक-मल्ल-मगध और गोनर्द —ये जनपद पूर्व दिशा में हैं ऐसा कहा गया है। इसके उपरान्त दूसरे दक्षिणा पथवासी जनपद हैं।५३-५४। पण्ड्य-केरल-चोल-कुल्य-सेतुक-मूषिक-क्षपण और वनवासिक देश हैं ।५६।

माहाराष्ट्रा महिषिकाः कलिंगाश्चैव सर्वशः ।
आभीराश्च सहैषीका आटव्या सारवास्तथा ॥५७
पुलिंदा विंध्यमौलीया वैदर्भा दंडकैः सह ।
पौरिका मौलिकाश्चैव अश्मका भोगवर्द्धनाः ॥५८
कौंकणाः कंतलाश्चांध्राः पुलिन्दाङ्गारमारिषाः ।
दाक्षिणाश्चैव ये देशा अपरांस्तान्निबोधत ॥५९
सूर्य्यारकाः कलिवना दुर्गालाः कुन्तलैः ।
पौलेयाश्च किराताश्च रूपकास्तापकैः सह ॥६०
तथा करीतयश्चैव सर्वे चैव करंधराः ।
नासिकाश्चैव ये चान्ये ये चैवांतरनर्मदाः ॥६१
सहकच्छाः समाहेयाः सह सारस्वतैरपि ।
कच्छिपाश्च मुराष्ट्राश्च आनर्ताश्चार्बुदैः सह ॥६२
इत्येते अपरांताश्च शृणुध्वं विंध्यवासिनः ।
मलदाश्च करूषाश्च मेकलाश्चोत्कलैः सह ॥६३

माहराष्ट्र-महिषिक-कलिङ्ग-सब ओर आभीर-सहैषीक-आटव्य-सार-पुलिन्द-विन्ध्य मौलेय-गोदन-दण्डक-पौरिक-मौलिक-अश्मक-भोग वर्धन-कोङ्कण-कन्तल-आन्ध्र-पुलिन्द-अंगार-मारिष-ये सब देश दक्षिणा पथ वासी

गांधारा यवनाश्चैव सिंधुसौवीरमण्डलाः ।
चीनाश्चैव तुषाराश्च पल्लवा गिरिगह्वराः ॥४७
शका भद्राः कुलिंदाश्च पारदा विन्ध्यचूलिकाः ।
अभीषाहा उलूताश्च केकया दशमालिकाः ॥४८
ब्राह्मणाः क्षत्रियाश्चैव वैश्यशूद्रकुलानि तु ।
कांबोजा दरदाश्चैव बर्बरा अंगलौहिकाः ॥४९

सह्य गिरि के उत्तरान्तों में जहाँ पर गोदावरी नदी बहती है इस सम्पूर्ण पृथिवी में वह प्रदेश परम सुन्दर है ।४३। वहाँ पुर है जिसका गोवर्धन नाम है और इसका निर्माण श्रीराम ने किया था । वहाँ पर श्रीराम के प्रिय स्वर्गीय और अत्युत्तम वृक्ष तथा औषधियाँ हैं ।४४। इन सबका अब रोपण श्रीराम की प्रीति के लिए भरद्वाज मुनि ने किया था । अतएव उन्होंने इस पुरवर का मनोरम उद्देश्य किया था। वाह्लीक-वाटधान-आमीर-कालतोयक-अपरान्त-सुह्य-पाञ्चाल-चर्ममंडल-गान्धार-यवन-सिन्धु सौवीर मण्डल-चीन-तुषार-पल्लव-गिरि गह्वरशक-भद्र-कुलिन्द-पारद-विन्ध्यचूलिका-अभीषाह-उलूत-केकय-दशमालिक ये सब देश तथा ब्राह्मण, क्षत्रिय, वैश्य और शूद्रों के कुल, काम्बोज-दरद-उर्वर और अङ्गलौहिक ये सब देश हैं ।४६-४९।

अत्रयः सभरद्वाजाः प्रस्थलाश्च दशेरकाः ।
लमकास्तालशालाश्च भूषिका ईजिकैः सह ॥५०
एते देशा उदीच्या वै प्राच्यान्देशान्निबोधत ।
अंगवंगाश्चोलभद्राः किरातानां च जातयः ।
तोमरा हंसमंगाश्च काश्मीरास्तंगणास्तथा ॥५१
झिल्लिकाश्चाहुकाश्चैव हूणदर्वास्तथैव च ॥५२
अंध्रवाका मुद्गरका अंतर्गिरिबहिर्गिराः ।
ततः प्लवंगवो ज्ञेया मलदा मलवर्तिकाः ॥५३
समंतराः प्रावृषेया भार्गवा गोपपार्थिवाः ।
प्राग्ज्योतिषाश्च पुंड्राश्च विदेहास्ताम्रलिप्तकाः ॥५४
मल्ला मगधगोनर्दाः प्राच्यां जनपदां स्मृताः ।
अथापरे जन पदा दक्षिणापथवासिनः ॥५५

हैं। और जो दक्षिण में होने वाले दूसरे जनपद हैं उनका भी ज्ञान प्राप्त करलो ।५७-५९। सूर्यारक-कलिवन-गुर्गल--कुन्तल--पौलेय--किरात--रूपक-तापक-करीति और सब करन्धर और नासिक तथा जो अन्य नर्मदा के अन्तर में हैं ।६०-६१। सहकच्छ-समाहेय-सारस्वत-कच्छिप-सुराष्ट्र-आनर्त-अर्बुद—ये सब और अपरान्त जो विन्ध्य के वास करने वाले हैं उनको आप सुनिये। मलद-करुष-मेकल-उत्कल-ये जनपद विन्ध्य के वास करने वाले हैं। ।६२-६३।

उत्तमानां दशार्णाश्च भोजाः किष्किंधकैः सह ।
तोशलाः कोशलाश्चैव त्रैपुरा वैदिशास्तथा ।।६४
तुहुण्डा बर्बराश्चैव षट्पुरा नैषधैः सह ।
अनूपास्तुंडिकेराश्च वीतिहोत्रा ह्यवंतयः ।।६५
एते जनपदाः सर्वे विंध्यपृष्ठनिवासिनः ।
अतो देशान्प्रवक्ष्यामि पर्वताश्रयिणश्च ये ।।६६
निहीरा हंसमार्गाश्च कुपथास्तंगणा शकाः ।
खपप्रावरणाश्चैव ऊर्णा दर्वाः सहूहुकाः ।।६७
त्रिगर्ता मंडलाश्चैव किरातास्तामरैः सह ।
चत्वारि भारते वर्षे युगानि ऋषयोऽब्रुवन् ।।६८
कृतं त्रेतायुगं चैव द्वापरं तिष्यमेव च ।
तेषां निसर्गं वक्ष्यामि उपरिष्टादशेषतः ।।६९

उत्तमों के दशार्ण-भोज-किष्किन्धक-तोशल-कोशप—त्रैपुर—वैदिश—तुहुण्ड—बर्बर—षट्पुर—नैषध—अनूप—तुण्डिकेर--वीतिहोत्र—अवन्ति—ये सब जनपद विन्ध्य गिरि के ऊपर निवास करने वाले हैं। इसके आगे मैं उन देशों का वर्णन करूँगा जो पर्वतों का आश्रय ग्रहण करके निवास किया करते हैं ।६४-६६। निहीर-हंसमार्ग-कुपथ-तङ्गण-शक-अप प्रावरण-ऊर्ण-दर्व-सहूहुक-त्रिगर्त-मण्डल-किरात-तामर-ये समस्त देश पर्वतों के ऊपर समाश्रय लेने वाले हैं। ऋषियों ने भारतवर्ष में चार युगों का होना बतलाया था। प्रथम कृतयुग अर्थात् सत्ययुग है—दूसरा त्रेता, तीसरा द्वापर और चौथा तिष्य है। इन सबका निसर्ग ऊपर से ही सम्पूर्ण मैं आपको बतलाऊँगा ।६७-६९।

युग संख्यावर्त

ऋषिरुवाच—चतुर्युगानि यान्यासन्पूर्वं स्वायंभुवेऽन्तरे ।
तेषां निसर्ग तत्त्वं च श्रोतुमिच्छामि विस्तरात् ।।१
सूत उवाच—पृथिव्यादिप्रसंगेन यन्मया प्रागुदीरितम् ।
तेषां चतुर्युगं ह्येतत्तद्वक्ष्यामि निबोधत ।।२
संख्ययेह प्रसंख्याय विस्तराच्चैव सर्वशः ।
युगं च युगभेदश्च युगधर्मास्तथैव च ।।३
युगसंध्यांशकश्चैव युगसंधानमेव च ।
षट्प्रकाशयुगाख्यैषा तां प्रवक्ष्यामि वत्वतः ।।४
लौकिकेन प्रमाणेन निष्पाद्याब्दं तु मानुषम् ।
तेनाशब्देन प्रसंख्यायै वक्ष्यामीह चतुर्युगम् ।
निमेषकालतुल्यं हि विद्याल्लघ्वक्षरं च यत् ।।५
काष्ठा निमेषा दश पंच चैव त्रिंशच्च काष्ठा गणयेत्कलां तु ।
त्रिंशत्कलाश्चापि भवेन्मुहूर्त्तस्तैस्त्रिंशता रात्र्यहनी समेते ।।६
अहोरात्रौ विभजते सूर्यो मानुषलौकिको ।।७

ऋषि ने कहा—जो चार युग हैं और पूर्व में स्वायम्भुव मन्वन्तर में थे। हे भगवन् ! उनका जिसर्ग कैसे हुआ और उनका क्या तत्व है—यह मैं विस्तार के साथ श्रवण करना चाहता हूँ ।१। श्रीसूत जी ने कहा—पृथिवी आदि के प्रसंग से जो मैंने पूर्व में कहा था उनके चारों युगों के विषय में मैं अब बतलाऊँगा। उसको आप भली-भाँति समझ लीजिए ।२। यहाँ पर संख्या के द्वारा प्रसंख्यान करके और सब प्रकार से विस्तृत मैं कहूँगा। युग-युग का भेद-युग का धर्म-युग सन्धि का अंश-युग सन्धान-यह षट् प्रकाश युग की आख्या है। उन सबको मैं तात्विक रूप से आपको बतलाऊँगा ।३-४। लौकिक प्रमाण मनुष्य के वर्ष का निष्पादन करके उसी शब्द से प्रसंख्यान करके यहाँ पर मैं चारों युगों को बतलाऊँगा। निमेष काल उसे ही जानना चाहिए जो कि लघु अक्षर के तुल्य होता है ।५। पन्द्रहनिमेषों का जितना काल होता है उसकी एक काष्ठा होती है और तीस काष्ठाओं के समय को

कला गिनना चाहिए। तीस कलाओं का एक मुहूर्त होता है। तीस मुहूर्तों के सम रात्रि और दिन हुआ करते हैं।६। दिन और रात्रि का विभाग सूर्य किया करता है जो कि मनुष्य का लौकिक होता है।७।

तत्राहः कर्मचेष्टायां रात्रिः स्वप्नाय कल्पते ।
पित्र्ये रात्र्यहनी मासः प्रविभागस्तयोः पुनः ॥८
कृष्णपक्षस्त्वहस्तेषां शुक्लः स्वप्नाय शर्वरी ।
त्रिंशद्ये मानुषा मासाः पित्र्यो मासस्तु सः स्मृतः ॥९
शतानि त्रीणि मासानां षष्ट्या चाप्यधिकानि वै ।
पित्र्यः संवत्सरो ह्येष मानुषेण विभाव्यते ॥१०
मानुषेणैव मानेन वर्षाणां यच्छतं भवेत् ।
पितॄणां त्रीणि वर्षाणि संख्यातानीह तानि वै ॥११
दश चैवाधिका मासाः पितृसंख्येह संज्ञिताः ।
लौकिकेनैव मानेन ह्यब्दो यो मानुषः स्मृतः ॥१२
एतद्दिव्यमहोरात्रं शास्त्रे स्यान्निश्चयो गतः ।
दिव्ये रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः ॥१३
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ।
ये ते रात्र्यहनी दिव्ये प्रसंख्यानं तयोः पुनः ॥१४

उनमें दिन तो कर्मों के करने की चेष्टा में लगाया जाता है और रात्रि का समय सोने के लिए कहा जाता है। दिव्य रात्रि और दिन मास होता है। उन दोनों या प्रविभाग फिर होता है।८। उनका कृष्ण पक्ष उनकी रात्रि होती है। मनुष्यों के जो तीस मास होते हैं वही पितृगणों का मास कहा गया है।९। तीन सौ साठ मासों का पितृगणों का एक वर्ष होता है। यह संख्या मनुष्यों के मासों से विभावित हुआ करती है।१०। मनुष्यों के मान से जो सौ वर्ष होते हैं वे पितृगणों के तीन वर्ष संख्यात किये गये हैं।११। यहाँ पर दश मास अधिक पितृ गणों की संख्या संज्ञा वाली हुई है। लौकिक मान से ही जो मनुष्यों का शब्द कहा गया है।१२। यह दिव्य अर्थात् देवों का अहोरात्र अर्थात् एक दिन और रात है जो शास्त्र निश्चय को प्राप्त हुआ है। दिव्य रात्रि और दिन वर्ष है और उन दोनों का फिर

प्रविभाग है ।१३। वहाँ पर जो दिन है वह उत्तरायण होता है और जो रात्रि है वह दक्षिणायन होता है जो वे दिव्य रात्रि और दिन हैं उनका पुनः प्रसंख्यान है ।१४।

त्रिंशद्यानि तु वर्षाणि दिव्यो मासस्तु स स्मृतः ।
यन्मानुषं शतं विद्धि दिव्या मासास्त्रयस्तु ते ॥१५
दश चैव तथाऽहानि दिव्यो ह्येष विधिः स्मृतः ।
त्रीत्रि वर्षशतान्येव षष्टिवर्षाणि यानि तु ।
दिव्यः संवत्सरो ह्येष मानुषेण प्रकीर्त्तितः ॥१६
त्रीणि वर्षसहस्राणि मानुषाणि प्रमाणतः ।
त्रिंशदन्यानि वर्षाणि मतः सप्तर्षिवत्सरः ॥१७
नव यानि सहस्राणि वर्षाणां मानुषाणि तु ।
अन्यानि नवतिश्चैव ध्रुवः संवत्सरः स्मृतः ॥१८
षड्विंशतिसहस्राणि वर्षाणि मानुषाणि तु ।
वर्षाणि तु शतं ज्ञेयं दिव्यो ह्येष विधिः स्मृतः ॥१९
त्रीण्येव नियुतान्याहुर्वर्षाणां मानुषाणि तु ॥२०
षष्टिश्चैव सहस्राणि संख्यातानि तु संख्यया ।
दिव्यवर्षसहस्रं तु प्राहुः संख्याविदो जनाः ॥२१

मनुष्यों के जो तीस वर्ष होते हैं उतने समय का देवों का दिव्य मास कहा गया है । जो मानवों के एक सौ वर्ष हैं उतने समय का दिव्य तीन मास हुआ करते हैं ।१५। तथा दश दिन हैं—यही दिव्य विधि कही गयी है । तीन सौ साठ जो वर्ष मनुष्यों के होते हैं यह एक दिव्य सम्वत्सर कहा गया है । ।१६। मनुष्यों के तीन हजार वर्ष प्रमाण से होते हैं और अन्य वर्ष हैं इतने समय का सप्तर्षियों का एक वत्सर होता है ।१७। मानवों के जो नौ हजार वर्ष होते हैं और अन्य नब्बे वर्ष हैं-इतने समय का ध्रुव सम्वत्सर हुआ करता है । मनुष्यों के छब्बीस हजार वर्षों का जो समय होता है वह समय होता है वह समय देवों का अर्थात् दिव्य सौ वर्ष हुआ करते हैं—यह विधि कही गयी है ।१८-१९। तीन नियुत ही मनुष्यों के वर्ष कहे जाते हैं ।२०। संख्या के द्वारा साठ सहस्र वर्ष ही संख्यात किये गये हैं । संख्या के ज्ञाता मनीषी गण दिव्य सहस्र वर्ष कहते हैं ।२१।

इत्येवमृषिभिर्गीतं दिव्यया संख्यया त्विह ।
दिव्येनैव प्रमाणेन युगसंख्याप्रकल्पनम् ॥२२
चत्वारि भारते वर्षे युगानि कवयोऽब्रुवन् ।
कृतं त्रेता द्वापरं च कलिश्चेति चतुष्टयम् ॥२३
पूर्वं कृतयुगं नाम ततस्त्रेता विधीयते ।
द्वापरं च कलिश्चैव युगान्येतानि कल्पयेत् ॥२४
चत्वार्याहुः सहस्राणि वर्षाणां च कृतं युगम् ।
तस्य तावच्छती संध्या संध्यया: संध्यया समः ॥२५
इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु ।
एकन्यायेन वर्तन्ते सहस्राणि शतानि च ॥२६
त्रीणि द्वे च सहस्राणि त्रेताद्वापरयोः क्रमात् ।
त्रिशती द्विशती संध्ये संध्यांशौ चापि तत्समौ ॥२७
कलिं वर्षसहस्रं तु युगमाहुर्द्विजोत्तमाः ।
तस्यैकशतिका संध्या संध्यांश संध्याय समः ॥२८

